दिनाङ्क : 23/07/2025 सायम : 06:20

**आदौ-मुख्यवार्ता:**

· प्रधानमन्त्री नरेन्द्रमोदी युनाइटेड किङ्ग्डम् इति देशस्य आधिकारिकयात्रायै लण्डन्-नगरं प्रति प्रस्थानमकरोत् ;कार्यसूच्याञ्च स्वतन्त्रव्यापारसमन्वयेन सह सुरक्षा शीर्षस्थाने स्तः।

· कोलाहलाधिक्येन संसदः उभयसदने श्वस्तनं यावत् स्थगिते।

· भारतेनोक्तं सीमापारतः आतङ्कवादस्य प्रवर्धकाणां राष्ट्राणामुपरि गभीरं मूल्यं दातव्यमिति।

· एशियन्-डेवेलपमेन्ट-बैङ्क इत्यस्य प्रतिवेदनानुसारं, अस्मिन् वित्तीयवर्षे सार्धषट् प्रतिशतात् अधिकया जी. डी. पी. इत्यस्य वृद्ध्या सह भारतं द्रुतगत्या वर्धमाना प्रमुख-अर्थव्यवस्था भविष्यति।

· क्रिकेट्-क्रीडायां, भारत-इंग्लैण्ड-देशयोः मध्ये मैञ्चेस्टर-नगरे महत्त्वपूर्णा चतुर्थी निकषस्पर्धा प्रचलति। भारतं विनैव हानिना अष्टसप्ततिः धावनाङ्कान् व्यरचयत्।

**प्रधानमन्त्री प्रस्थितवान्**

प्रधानमन्त्री नरेन्द्रमोदी ब्रिटेन-मालदीव-देशयोः चतुर्दिवसीयायाम् आधिकारिकयात्रायां प्रस्थितवान्। यात्रायाः प्रथमचरणे सः यूके-देशस्य समकक्षेण कीर् स्टार्मर इत्यनेन सह चर्चां करिष्यति, सहैव हि किंग-चार्ल्स-थर्ड इत्यनेन सहापि मेलनं विधास्यति। वर्षानुवर्षेषु, भारत-यू. के. देशयोः ऐतिहासिकसम्बन्धः दृढः, बहु-पक्षीयः, परस्पर-लाभप्रदत्वेन च परिवर्तितोऽस्ति। उभौ देशौ उच्चस्तरीयं राजनैतिकं संवादमपि नैरन्तर्येण सम्पाद्यमानौ स्तः। स्वतन्त्र-व्यापार-सन्धिः एफ़. टि. ए. इत्यस्योपरि हस्ताक्षरानन्तरं सम्बन्धोऽयं इतोऽपि दृढतर:

भविष्यतीति अपेक्षते। सन्धौ व्यापार-रक्षादीनि अनेकानि क्षेत्राणि सम्मिलितानि भविष्यन्ति। चतुर्दशोत्तरद्विसहस्रतमवर्षात्परं युनैटेड् किङ्ग्डम्-देशं प्रति श्रीमोदिनः एषा चतुर्थी यात्रा अस्ति, यत्र सः स्वस्य ब्रिटिश्-समकक्षेण सह विस्तृतं वार्तालापं करिष्यति। भारतीय-प्रवासिनः अपि अद्य प्रधानमन्त्रिणं मोदीं मिलितुं उत्सुकाः सन्ति।

श्रीमोदी श्वः किंग- चार्ल्स इत्यनेन सह सौजन्य-मेलनं करिष्यति। आकाशवाणी इत्यनेन सह वार्तालापं कुर्वन्, यू. के. इति देशे भारतस्य उच्चायुक्तः विक्रमकुमार-दुरैस्वामी इत्येषः उक्तवान् यत् इयं यात्रा परस्परं लाभप्रदं भविष्यतीति अपेक्ष्यते।

प्रवासस्य द्वितीये चरणे, प्रधानमन्त्री माल्दीव्स्-देशस्य राष्ट्रपतिना मोहम्मद् मुइज़ू इत्यस्य आमन्त्रणे जुलाई-मासस्य पञ्चविंशषड्विंशदिनाङ्कयोः माल्दीव्स्-देशं यास्यति। यात्रावधौ श्रीमोदी द्वयोः देशयोः व्यापारनेतृभिस्सहापि संवादं करिष्यति।

**सदनयोः निरसनम**

विपक्षस्य स्वप्रतिवादानाम् घोषत्वेन अन्ववर्तनात् अद्य निरन्तरं तृतीयदिवसेऽपि उभयसदनयोः कार्याचरणानि स्थगितानि। ते बिहारराज्यस्य मतदाता-सूच्यां विशेष-गहन-संशोधनस्य विषयेण सह अन्यविषयेषु च चर्चां कर्तुम् आग्रहम् कुर्वन्तः आसन्। अद्य लोक-राज्यसभयोः द्विवारं स्थगनम् अभवत्, अन्ततः दिनपर्यन्तं स्थगितम् अभवत्। लोकसभायां, द्वयोः स्थगनयोर्मध्ये, केन्द्रीय-रेल्मन्त्री अश्विनी वैष्णवः बिहारस्य रेल्-परियोजनानां विषये प्रश्नस्य उत्तरम् अददात्।

**संयुक्त राष्ट्र-भारत-□ाकः**

भारतदेशः सीमापारात् आतङ्कवादस्य पोषकभूतानां राष्ट्राणामुपरि गभीरं मूल्यं धारयितुं आवाहनम् अकरोत्। भारतस्य स्थायीप्रतिनिधिः पी. हरीशः संयुक्तराष्ट्र-

सुरक्षा-परिषदि अवदत् यत् अन्ताराष्ट्रिय-शान्तिं सुरक्षाञ्च प्रवर्धयितुं आतङ्कवादं प्रति शून्य-सहिष्णुता इत्यादीनां कानिचन मूलभूतसिद्धान्तानां सम्मानः आवश्यकः अस्तीति। सः पाकिस्तानं, भारतीयलोकतन्त्रस्य विकासस्य च तुलनायां वैषम्ययुतः, धर्मान्धतायां निमग्नः क्रमबद्धरूपेण ऋणमग्नग्राहकत्वेन च वर्णितवान्।

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यस्य मध्यस्थतायाः विषये आरोपान् निराकृत्य, संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः अवदत् यत्, प्राथमिकलक्ष्याणि प्राप्य आपरेशन् इति पाकिस्तानस्य आग्रहात् एवं स्थगितमिति।

-

**भारत-जीडी□ी-एडीबी**

अद्य एशियन्-डेवेलप्मेण्ट्-बैङ्क् इत्यनेन प्रकाशिते प्रतिवेदने उक्तं यत् भारतस्य अर्थव्यवस्था प्रमुख- अर्थव्यवस्थासु द्रुतगत्या वर्धमाना भविष्यति, पञ्चविंशत्युत्तरद्विसहस्रतमे वर्षे जी. डि. पि. इत्यस्य वृद्धिः सार्धषट्प्रतिशतं, तदग्रिमे च वर्षे प्रतिशते दशमलवद्वि- अङ्कयोश्च वृद्धिः भविष्यतीति।

**प्रसारणदिवसः**

भारतस्य विकासे, शैक्षणिक-प्रसारणे, सांस्कृतिक-संरक्षणे च प्रसारणस्य महत्त्वपूर्णां भूमिकां प्रकाशयितुं अद्य सम्पूर्णे देशे राष्ट्रिय-प्रसारण-दिवसः आचर्यते। सप्तविंशत्यधिकैकोनविंशतितमवर्षस्य अस्मिन्नेव दिने इण्डियन्-ब्राड्कास्टिङ्ग्-कम्पनी इत्यस्य अधीने बाम्बे इति-स्थानकात् देशस्य प्रथमं रेडियो-प्रसारणं प्रारब्धम्। षड्त्रिंशदधिकैकोनविंशतितमवर्षस्य च जून्-मासस्य अष्टमे दिनाङ्के, भारतीय-राज्य-प्रसार-सेवायाः नाम अखिल-भारतीय-रेडियो (ए. आई. आर्.) इति पुनर्नामकरणं कृत्वा, पश्चात् आकाशवाणी इति नाम प्राप्तम्। अस्मिन् अवसरे प्रसारभारती-संस्थायाः अध्यक्षः नवनीतकुमारसहगलः अवदत् यत्, वर्षानुवर्षेभ्यः

शिक्षायाः, सूचनानां, मनोरञ्जनस्य च पोषणार्थं आकाशवाणी महत्त्वपूर्णः साधनभूतोऽस्तीति।

प्रसारभारती इत्यस्य मुख्यकार्याध्यक्षः गौरव द्विवेदी अवदत् यत्, नवतिवर्षप्राचीना राष्ट्रियपरम्परारूपेण स्थापिता आकाशवाणी इदानीमपि प्रबलतया प्रासङ्गिकास्तीति।

अत्रान्तरे, आकाशवाणी-महा-निदेशिका डा. प्रज्ञा पालीवाल् गौर् इत्येषा अकथयत् यत् यदा वयं एतेषां ऐतिहासिक-लक्ष्याणां समीपम् आगमिष्यामः तदा आकाशवाणी नवीकृता, प्रासङ्गिका, भविष्याय च सज्जा भवति।

आकाशवाणी उत्तरतः दक्षिणं यावत्, पूर्वतः पश्चिमं यावत् राष्ट्रस्य आत्माभिः सह वार्तालापं कुर्वन्ती, जनान् सूचितुं, शिक्षितुं, मनोविनोदयितुं च, तस्य बहुजनहिताय बहुजनसुखाय इति ध्येयवाक्यम् सार्थकं करोति च।

**<u>लो.स.इण्डिया-ए. आई. मिशन</u>**

इलेक्ट्रानिक्स् तथा आई. टी. मन्त्री अश्विनी वैष्णवः अवदत् यत् भारते दृढा सूचना-तन्त्रज्ञान-पारिस्थितिकी अस्ति या हि सार्धद्विशत-बिलियन्-डालर इत्यतोधिकस्य वार्षिक-राजस्वस्य उत्पादनं करोति। अद्य लोकसभायां एकस्य प्रश्नस्य लिखित-प्रत्युत्तरे श्री वैष्णवः अवदत् यत् षष्ठी लक्षतोधिकेभ्यः जनेभ्यश्च वृत्यवसरं प्रददातीति।

**भारतीय-ऋतुविज्ञान-विभागः**

भारतीय-ऋतुविज्ञान-विभागेन अद्य जम्मू-कश्मीर्, लद्दाख्, गिल्गिट्-बाल्टिस्तान्, मुज़फ़्फ़राबाद् इत्येतेषु प्रदेशेषु विद्युत्-वायुभ्यां सह प्रचण्डतोऽतिप्रचण्डवृष्ट्यै नारङ्ग-सूचना दत्ता अस्ति। अनेनैव सह अद्य हरियाणा, चण्डीगढ, दिल्ली, हिमाचलप्रदेश इत्यादिषु पृथक्-पृथक् स्थानेषु प्रचण्डतः अति-प्रबलपर्यन्तवर्षायाः पूर्वानुमानं कृतम् अस्ति।

## क्रिकेट-क्रीडा

क्रिकेट्-क्रीडायां, भारत-इंग्लैण्ड-देशयोः मध्ये मैञ्चेस्टर-नगरे महत्त्वपूर्णा चतुर्थी निकषस्पर्धा प्रचलति। यदा अन्तिमानि विवरणानि प्राप्तानि तावत् भारतं विनैव हानिना अष्टसप्ततिः धावनाङ्कान् व्यरचयत्।